IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# लघुपाणिनीयस्य सुबन्तप्रकरणसमीक्षा।

Poornima.B
Research Scholar,
Department of Sanskrit Vyakarana,
Sree Sankaracharya University of Sanskrit, Kalady, Kerala

## संक्षेपः

*लघुपाणिनीयस्य सुबन्तप्रकरणसमीक्षा इति प्रबन्धे पाणिनीयव्याकरणस्य सूत्रपद्धतेः तथा प्रक्रियापद्धतेः विशेषतां विवेच्य लघुपाणिनीयस्य ग्रन्थस्वरूपं प्रदर्शितम्। अनन्तरं प्रक्रियाग्रन्थपरम्परायां रूपावतारः, रूपमाला, प्रक्रियाकौमुदी, सिद्धान्तकौमुदी, प्रक्रियासर्वस्वम् इत्यादीनां ग्रन्थानां सुबन्तप्रकरणानां तुलनात्मकपरिशीलनं कृतम्। तेषु सर्वेषु ग्रन्थेषु प्रातिपदिकस्य अन्त्यवर्णलिङ्गयोः अनुगुणेन सुबन्तरूपनिर्माणप्रक्रिया निरूपिता दृश्यते, तथापि विभागविन्यासे तथा शिक्षणपद्धत्यां सूक्ष्मभेदाः सन्ति। लघुपाणिनीये तु एषां परम्परां परित्यज्य प्रत्ययप्रधानदृष्ट्या सुबन्तप्रक्रियायाः नव्यरूपेण पुनर्व्यवस्था कृता। अनेन अस्य ग्रन्थस्य वैज्ञानिकता, विश्लेषणात्मकता, शिक्षणोपयोगिता च विशेषतया प्रकाशते। अतः प्रक्रियाग्रन्थपरम्परायां लघुपाणिनीयस्य स्थानं विशिष्टमुत्कृष्टं च इति निष्कर्षः प्रतिपाद्यते ।*

***Index Terms* - लघुपाणिनीयम्, पाणिनीयव्याकरणम्, प्रक्रियापद्धतिः, सुबन्तप्रकरणम्**

## I. उपोद्घातः

पाणिनीयव्याकरणस्य द्वौ प्रकारकौ अध्ययनपद्धती प्रचलतः। सूत्रपद्धतिः अथवा काशिकापद्धतिः तथा प्रक्रियापद्धतिश्च। यत्र अष्टाध्यायीसूत्रक्रमेण सूत्रार्थः उदाहरण-प्रत्युदाहरणानि, वर्तिकानि, गणपाठादीनामध्ययनं क्रियते, तदर्थं सर्वाश्रयणीया भवति काशिका इत्यतः इयं पद्धतिः काशिकापद्धतिः इति व्यवह्रियते। अष्टाध्यायीसूत्राणि प्रकरणशः विभज्य प्रयोगसाधुत्वाय आवश्यकानि सूत्राणि, वृत्तिसहितम् उदाहरण-प्रत्युदाहरण-वार्तिकादि अंशान् प्रत्येके सूत्रे विविच्याध्ययनं क्रियते इत्यततः इयं च प्रक्रियापद्धतिः इति व्यवह्रियते।

प्रक्रियाग्रन्थानामाविर्भावेन व्याकरणशास्त्राध्ययने महान् परिवर्तनः सञ्जातः। अस्यां प्रक्रियापद्धत्यां ए.आर् राजराजवर्मणा विरचितस्य लघुपाणिनीयस्य सविशेषतां विद्यते। प्रक्रियाग्रन्थलक्षणानुसारम् आधुनिककाले विरचिते ग्रन्थेऽस्मिन् प्रकरणप्रतिपादनशैली भिन्ना, नूतना च वर्तते। अस्मिन् ग्रन्थे राजराजवर्मणा प्रक्रियापद्धत्यां कालानुसृतपरिवर्तनानि आवश्यकानि इति विचिन्त्य काशिकापद्धत्यां तथा प्रक्रियापद्धत्यां च दृश्यमानान् क्लेशान् निवारयितुं नवीनमेकं प्रस्थानमाविष्कृतम्। तदर्थं लघुपाणिनीये काशिकापद्धतिः - कौमुदीपद्धतिः इति प्राचीनप्रस्थानद्वयस्य संमिश्रः मार्गः गृहीतः।

## II. मुख्यविषयः

ए.आर् राजराजवर्मणा विरचितं लघुपाणिनीयं पूर्वोत्तरखण्डाभ्यां विभज्य प्रकाशितः। १९११ तमे वर्षे पूर्वखण्डः, तथा १९१३ तमे वर्षे उत्तरखण्डः च प्रकाशितः। लघुपाणिनीये अष्टाध्याय्याः सर्वाणि सूत्राणि न व्याख्यातानि। पूर्वखण्डे १७६५

सूत्राणि, उत्तरखण्डे १९४ वैदिकसूत्राणि च व्याख्यातानि। ग्रन्थेऽस्मिन् विषयविभागः न केवलं प्रक्रियादृष्ट्या प्रकरणशः विभजितः अपि च आधुनिकभाषाशास्त्रमनुसृत्य कृतः। यद्यपि आधुनिकभाषाशास्त्रमनुसृत्य संस्कृतव्याकरणग्रन्थाः आङ्गलभाषादिषु द्रष्टुं शक्यते तथापि संस्कृतभाषायां पाणिनीयव्याकरणस्य भाषाशास्त्रसमन्वितेन विरचितः प्रथमः ग्रन्थः भवति लघुपाणिनीयम्।

अस्मिन् पूर्वखण्डे मुख्यतया चत्वारः विभागाः सन्ति –

१. अक्षरनिरूपणपरः शिक्षाकाण्डः

२. शब्दानां रूपसिद्धिविचारकः परिनिष्ठाकाण्डः

३. शब्दानां व्युत्पत्तिप्रतिपादको निरुक्तकाण्डः

४. पदानामन्वयव्यवस्थावर्णनरुपः आकाङ्क्षाकाण्डः चेति

शिक्षाकाण्डः

प्रथमे शिक्षाकाण्डे संज्ञाप्रकरणं, परिभाषाप्रकरणं, सन्धिप्रकरणं, शब्दविभागः इति चत्वारः उपविभागाः सन्ति। अक्षरसम्बन्धिव्याकरणकार्याणि एव शिक्षाकाण्डस्य मुख्यप्रतिपाद्यविषयः। शास्त्राध्ययनं पारिभाषिकशब्दानां ज्ञानेन विना कठिनं वर्तते इत्यतः संज्ञाप्रकरणेन शिक्षाकाण्डः आरभते। संज्ञासूत्राणां व्याख्यानात् प्राक् लौकिकाक्षरमाला प्रदर्श्यते। तदनन्तरम् आमुखत्वेन वर्णाक्षरयोः भेदः, वर्णानां विभागः, इत्यादि भाषासम्बन्धि सामान्यकार्याणि उक्त्वा संज्ञासूत्राणि व्याख्यातानि। इदं शैली नूतना वर्तते। अन्येषु प्रक्रियाग्रन्थेषु आदौ पाणिनीयव्याकरणस्य मूलभूतानि माहेश्वरसूत्राणि प्रातिपाद्यन्ते। लघुपाणिनीये संज्ञाप्रकरणस्य मध्ये एव माहेश्वराणि सूत्राणि उपन्यस्तानि।

संज्ञाप्रकरणे सर्वाणि संज्ञासूत्राणि न व्याख्यातानि, सन्धेः ज्ञानाय आवश्यकानि संज्ञासूत्राण्येव अस्मिन् प्रकरणे व्याख्यातानि। सुबन्तप्रक्रियायां उपयुक्ताः सर्वनाम , नदी, सर्वनामस्थान इत्यादि संज्ञाः सुबन्तप्रकरणे संज्ञा इति पुनरपि विभागे व्याख्याताः। संज्ञाप्रकरणान्तरं लाघवाय सन्देहनिवारणाय च शास्त्रेषु स्वातन्त्र्येण निबद्धानि परिभाषासूत्राणि परिभाषाप्रकरणमिति द्वितीये उपविभागे व्याख्यातानि।

सन्धिप्रकरणमिति तृतीये उपविभागे सन्धिसूत्राणि व्याख्यातानि। द्वयोः पदयोः संयोगे, अथवा प्रकृति-प्रत्यययोः मेलने, ये वर्णपरिवर्तनरूपा विकाराः उत्पद्यन्ते, ते सन्धिकार्याणि इति लघुपाणिनीये निर्दिश्यन्ते। लघुपाणिनीये सन्धिप्रकरणं स्वरसन्धिः तथा हल्सन्धिः इति द्विधा प्रदर्शिता। अन्येषु प्रक्रियाग्रन्थेषु तु सन्धीनाम् अवान्तरविभागाः—यथा तुक्सन्धिः, सुट्सन्धिः, अच्सन्धिः, हल्सन्धिः, विसर्गसन्धिः, प्रकृतिभावः, स्वादिसन्धिः इत्यादयः आचार्यमतानुसारं पृथक् निरूपिताः दृश्यन्ते। अत्र लघुपाणिनीये स्वरसन्धौ तथा हल्सन्धौ च वर्णविकाराः स्थानभेदमाश्रित्य प्रतिपादिताः। एते विकाराः त्रिषु स्थानेषु सम्भवन्ति—पदयोः मध्ये, पदान्ते, तथा पदमध्ये पदान्ते च। अस्यां पद्धत्यां स्थानभेदमवलम्ब्य पाणिनीयसूत्राणि विन्यस्य, तदनुसारिणि उदाहरणानि अपि प्रदर्शितानि। स्वरसम्बद्धा विकाराः स्वरसन्धौ, व्यञ्जनसम्बद्धा विकाराः हल्सन्धौ इति विभागेन निरूपिताः। अवान्तरविभागाः अपि स्वर-व्यञ्जनविकाररूपत्वात् पृथग्विभागेन न स्वीकृताः, किन्तु एतेष्वेव मुख्यविभागयोः अन्तर्भाविताः।

प्रक्रियाग्रन्थेषु शब्दविभागो नाम प्रकरणं नूतनं वर्तते। शब्दविभागे प्रकृतेः विभागः(प्रातिपदिकं, धातुः), पदस्य विभागः इत्यादि विषयाः व्याख्यातानि। अमुं विषयमधिकृत्य रचितानि सूत्राणि भिन्नप्रकरणेषु अन्यप्रक्रियाग्रन्थेषु प्रतिपादितानि।

परिनिष्ठाकाण्डः

पदार्थस्य ज्ञानेन विना वाक्यार्थज्ञानं न संभवति। अर्थात् वाक्यार्थज्ञानाय पदज्ञानस्य अपेक्षा वर्तते। तच्च पदं वैयाकरणमते द्विविधं, सुबन्तं, तिङन्तं च । अतः पदनिष्पत्तिरेव द्वितीयकाण्डस्य प्रतिपाद्यविषयः।“सुप्तिङन्तं पदम् (१.४.१४ )” इति सूत्रक्रममनुसृत्य सुबन्तानां पदनिष्पत्तिरेव आदौ क्रियते। परन्तु पदस्य प्रकृतेः प्रातिपदिकानां लिङ्गभेदं वर्तते।

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् इति परिभाषानुसारेण लिङ्गव्यवस्थानिरूपणानन्तरमेव सुबन्तप्रक्रियायाः निरूपणं लघुपाणिनीये कृतम्। अस्य लिङ्गप्रकरणस्य नाम स्त्रीप्रत्ययप्रकरणमिति अन्येषु प्रक्रियाग्रन्थेषु स्वीकृतं भवति। तच्च सुबन्तप्रकरणान्तरमेव व्याख्यातम्।

लघुपाणिनीये सुबन्तप्रक्रिया संज्ञा, सन्धिकार्याणि, प्रत्ययानामदेशः, अङ्गकार्याणि इत्यादि उपविभागेषु विभज्य व्याख्याता। द्वितीयस्य पदविभागस्य तिङन्तस्य प्रक्रिया लकाराणां सार्वधातुक -आर्धधातुकभेदेन व्याख्यातानि। एवं विकरणभेदवतां लट्- लङ् - लोट् - लिङां च प्रक्रिया तिङन्तप्रकरणे आदौ निरूपिता। तस्मिन् एकस्य धातुगणस्य चतुर्णां सार्वधातुकलकाराणां प्रक्रियां प्रदर्श्य, अन्यानां गणानां रूपाणि निरूपयन्ति। धातुगणक्रमे भिन्नः क्रमः स्वीकृतः। भूवादि, तुदादि, दिवादि, स्वादि, तनोत्यादि, क्र्यादि, रुधादि, अदादि, जुहोत्यादि इति। प्रक्रियालाघवाय अकारन्तविकरणकानां गणार्थमिदं गणक्रममुल्लखनमिति अवगन्तुं शक्यते। तदन्तरम् आर्धधातुकलकाराणां प्रक्रिया प्रदर्शिता । तिङन्तप्रक्रियानन्तरं व्युत्पन्नधातवः,पदव्यवस्था, कृत्प्रकरणम्, लकारार्थप्रकरणम्, विभक्त्यर्थप्रकरणम् इत्यादि प्रकरणानि परिनिष्ठाकाण्डे क्रमशः निरूपितानि।

निरुक्तकाण्डः

तृतीये निरुक्तकाण्डे शब्दनिष्पत्तिविषयाः व्याख्याताः। कृत्प्रत्ययैः निष्पन्नमानानि कृदन्तरूपाणि एवं तद्धितप्रत्ययैः निष्पन्नमानानि तद्धितरूपाणि एव अस्य निरुक्तकाण्डस्य प्रतिपाद्यविषयः। किन्तु प्रसङ्गवशात् परिनिष्ठाकाण्डे कृदन्तानां निरूपणं कृतम्। अतः निरुक्तकाण्डेऽस्मिन् तद्धितविधायकानि सूत्राणि व्याख्यातानि।

आकाङ्क्षाकाण्डः

पदानां परस्पराकाङ्क्षायां समासपदानि उत्पाद्यन्ते। अतः आकाङ्क्षाकाण्डे समासविधायकानि सूत्राणि व्याख्यातानि। व्युत्पनानां पदानां परस्परान्वये विहितानि समासविधायकानि सूत्राणि अष्टाध्यायी क्रमेण व्याख्यातानि। एवं पूर्वखण्डः समाप्तः।

## III. निरीक्षणानि

सुबन्तप्रकरणसमीक्षा

प्रक्रियाग्रन्थेषु प्रायेण सन्धिप्रकरणानन्तरं सुबन्तपदानां प्रक्रिया निरूपिता। रूपावतारे अस्य प्रकरणस्य नाम विभक्त्यवतारः इति धर्मकीर्तिना कृतः। विभक्त्यवतारे अजन्त-हलन्तभेदेन, पुं-स्त्री-नपुंसकलिङ्गत्रयेण च षट् विभागाः निर्मिताः। अजन्तप्रकरणं मातृकावर्णक्रमेण निरूपितम्, हलन्तप्रकरणं वर्णसमाम्नायक्रमेण च निरूपितम्। हलन्तप्रकरणे अलिङ्गप्रकरणमिति उपविभागः अपि कृतः। तस्मिन् अलिङ्गप्रकरणे अस्मद्-युष्मद् शब्दयोः प्रक्रिया प्रदर्शिता। रूपावतारे सुबन्तप्रकरणस्य वर्गीकरणस्य आधारः प्रातिपदिकस्य अन्त्यवर्णः तथा लिङ्गं च भवति। । प्रक्रियायाः पूर्वं कारकविभक्तिसूत्राणां व्याख्यानं कृत्वा रूपनिर्माणं दर्श्यते, येन रूपार्थयोः समन्वयः साध्यते।

रूपमालायां सुबन्तप्रक्रिया अजन्तमाला, हलन्तमाला, नियतलिङ्गमाला, सर्वनाममाला, संख्यामाला, छादसमाला इति षड्सु विभागेषु प्रदर्शिता। अजन्तमालायां वर्णसमाम्नायक्रमानुसारम् अजन्तशब्दानां प्रक्रिया निरूपिता। अत्र अनियतलिङ्गशब्दाः, विशेषणशब्दाः, संज्ञाशब्दाश्च त्रिषु लिङ्गेषु व्यवस्थिताः सन्ति। हलन्तमालायां तु केवलं संज्ञाशब्दानां रूपाणि एव निरूप्यन्ते। सर्वनाममालायां सर्वनामशब्दाः पृथक् विभागेन उपस्थाप्यन्ते। युष्मद्-अस्मद्-शब्दयोः प्रक्रिया अपि सर्वनाममालायां एव प्रदर्शिता, अतः तयोः सर्वनामत्वं विशेषेण प्रकाश्यते। संख्यामालायां संख्याशब्दानां पृथक् विवेचनं कृतम्।

नियतलिङ्गमालायां सखि, पति, नृ इत्यादीनां विशिष्टरूपाणि निरूपितानि, ये अन्यत्र अजन्तप्रकरणेषु अन्तर्भवन्ति। छान्दसमालायां तु वैदिकरूपाणां प्रक्रिया पृथग्विधिना प्रदर्शिता।

प्रक्रियाकौमुद्यां, सिद्धान्तकौमुद्यां च सुबन्तप्रक्रिया प्रायेण समाना वर्तते। प्रातिपदिकानां अन्त्यवर्णानुसारेण द्वौ विभागौ कृतौ। अजन्तशब्दाः, हलन्तशब्दाश्च। ततः लिङ्गानुसारेन अजन्तहलन्तयोः त्रीन् विभागान् विधाय सुबन्तस्य षट् विभागाः कृताः। अजन्तप्रतिपतिकानाम् अकारादिक्रमः आश्रितः। हलन्तप्रातिपदिकानां वर्णसमाम्नायक्रमः च आश्रितः। सर्वनामशब्दाः तथा संख्याशब्दाः पृथक् विभागरूपेण न निरूपिताः, किन्तु तेषां प्रातिपदिकानामन्त्यवर्णं लिङ्गं च विचार्य, ते तत्तत्सम्बद्धेषु प्रकरणेषु एव समुचिततया समाविष्टाः सन्ति।

प्रक्रियासर्वस्वे सुबन्तप्रकरणं 'सुब्विधिखण्डः' इति नाम्ना निर्दिष्टं, यत् स्वकीयविन्यासवैशिष्ट्येन अन्यप्रक्रियाग्रन्थेभ्यः स्पष्टतया भिन्नं दृश्यते। सामान्यतया सन्धिप्रकरणानन्तरं सुबन्तप्रक्रियाया निरूपणं क्रियते, परन्तु अत्र ग्रन्थकारः सुबन्तप्रकरणाद्पूर्वमेव कृत्-तद्धित-समास-स्त्रीप्रत्ययानां विस्तृतनिरूपणं कृत्वा प्रातिपदिकनिर्माणस्य आधारं सुदृढीकृत्य पश्चात् सुबन्तप्रक्रियामारभते, यत् तात्त्विकदृष्ट्या अत्यन्तं युक्तिसंगतम्। अयं सुब्विधिखण्डः अष्टधा विभक्तः, यत्र परम्परागतषड्विभागातिरिक्ततया अव्ययानां समावेशः अपि कृतः, यद्यपि तेषां लिङ्ग-विभक्ति-वचनपरिवर्तनाभावः अस्ति, तथापि पाणिनिना अव्ययानां सुबन्तेन परिगणनत्वात् तेषामत्र ग्रहणं शास्त्रीयसंगतिमनुवर्तते। अस्य अन्यत् वैशिष्ट्यं "द्विरुक्ति" इति नूतनविभागस्य समावेशः, यत्र शब्दानां द्विरावृत्त्या रूपनिर्माणप्रक्रिया सूत्रैः सह उदाहरणैः स्पष्टतया निरूपिता। एतेषां नवीनविभागानां विन्यासे सत्यपि, अस्मिन् ग्रन्थे रूपनिर्माणस्य मूलप्रक्रिया कौमुद्यादिग्रन्थवत् अकारादिक्रमं तथा वर्णसमाम्नायक्रमं च आश्रित्य प्रवर्तते।

लघुपाणिनीयस्य सुबन्तप्रकरणं परम्परागतप्रक्रियाग्रन्थानां पद्धतेः अपेक्षया अत्यन्तं विशिष्टं दृश्यते। अत्र ग्रन्थकारः पूर्वप्रचलितां प्रातिपदिकान्तलिङ्गाश्रितां प्रक्रियाशैलीं केवलं न परिवर्तयति, अपि तु तस्याः मूलतत्त्वस्य पुनर्विचारं कृत्वा नूतनां पद्धतिं प्रतिष्ठापयति। अन्येषु ग्रन्थेषु यथा प्रातिपदिकस्य अन्त्यवर्णः लिङ्गं च आश्रित्य सुबन्तरूपाणि निष्पाद्यन्ते, अत्र पाणिनीयसूत्रव्यवस्थायाः अन्तर्निहिततत्त्वं प्रमुखतया स्वीकृतम्। तेन सुबन्तप्रक्रिया सुप्-प्रत्ययानां स्वरूपम्, नदी-घि इत्यादि संज्ञाः, तथा अङ्गसंज्ञाविशेषाः भसंज्ञा, पदसंज्ञा, सर्वनामस्थानसंज्ञा इत्यादीनाम् अनुगुणेन प्रवर्तते। अतः अत्र प्रक्रिया न लिङ्गाधीना, न केवलं प्रातिपदिकान्ताधीना, किन्तु प्रत्ययप्रधानव्यवस्थायामेव प्रतिष्ठिता।

लघुपाणिनीये सुबन्तप्रकरणस्य निरूपणम् अन्येभ्यः प्रक्रियाग्रन्थेभ्यः भिन्नः भवति। सुबन्तप्रकरणे प्रक्रियानिर्वाहात् पूर्वं औकारान्तः पुंलिङ्गः 'ग्लौ' शब्दः, तथा दकारन्तः स्त्रीलिङ्गः 'संपद्' शब्दयोः सर्वेषां रूपाणां प्रक्रिया प्रदर्यते। अनयोः शब्दयोः प्रक्रियानिर्वाहार्थं शिक्षाकाण्डे पठितानां सूत्राणामेव आवश्यता वर्तते। अनेन छात्राणां प्रक्रियाकरणे अवबोधः प्राप्स्यते। इदञ्च क्रमशिक्षासिद्धान्तस्य प्रायोगिकदृष्ट्या लघुपाणिनीये समावेशः प्रकाशयते।

लघुपाणिनीये अजन्तहलन्तविभागाभ्यां पुं-स्त्री-नपुंसकभेदेन प्रक्रिया न प्रदर्शिता। परं संज्ञा, सन्धिकार्याणि, प्रत्ययानामादेशः, अङ्गकार्याणि इति चतुर्षु मुख्यविभागेषु सुबन्तरुपाणां प्रक्रिया प्रदर्शिता।। अथ प्रकरणान्तरविहितानि कार्याणि, भसंज्ञाकार्याणि, णत्वप्रकरणं, षत्वप्रकरणं, युष्मद्-अस्मद् प्रक्रिया इत्यादि उपविभागाः च कृताः।

ग्रन्थेऽस्मिन् अन्यप्रक्रियाग्रन्थेष्विव क्रमशः रूपनिर्माणप्रदर्शनं न दृश्यते, अपि तु प्रकृतिप्रत्यययोः विकाराः पृथक्-पृथक् निरूप्यन्ते। यद्यपि वस्तुतः रूपसिद्धिः तयोः संयोगेनैव भवति, तथापि विभागपूर्वकनिरूपणेन प्रक्रियायाः सूक्ष्मतत्त्वं सुस्पष्टतया बोध्यते। एषा पद्धतिः विश्लेषणात्मकदृष्ट्या अत्यन्तोपयोगिनी अस्ति। प्रकरणान्ते च सामान्यशब्दानां रूपावलिः सङ्क्षेपेण पट्टिकायां प्रदर्श्यते, येन सिद्धान्तज्ञानस्य व्यवहारिकप्रयोगोऽपि सुलभतया अवगम्यते। एवं सैद्धान्तिकविवेचनस्य रूपप्रदर्शनस्य च समन्वयः अस्य ग्रन्थस्य विशिष्टं वैशिष्ट्यं भवति।

वास्तवतः सुबन्तप्रक्रिया न केवलं लिङ्गमात्रमाश्रित्य प्रवर्तते, अपि तु विशेषतः हलन्तप्रातिपदिकानां सन्दर्भे सन्धिज्ञानस्यैव प्रमुखता दृश्यते। बहुषु हलन्तस्थलेषु प्रक्रियाः उपधामाश्रित्य भवन्ति, न तु केवलम् अन्त्यवर्णमाश्रित्य, अतः हलन्तपुंलिङ्ग-हलन्तस्त्रीलिङ्गयोः मध्ये विशेषः प्रक्रियाभेदः नोपलभ्यते। अष्टाध्याय्याः सूक्ष्मविश्लेषणेनापि ज्ञायते यत् सुबन्तप्रक्रिया सुप्-प्रत्ययानां सर्वनामस्थान-असर्वनामस्थानभेदेन, अङ्गानां भ-पद-नदी-घि-संज्ञाविभागैः, तेषां च अनुगुणैः अङ्गकार्यैः सह समन्वयेनैव रूपसिद्धिं साधयति। इदं स्पष्टं भवति सुबन्तप्रक्रिया न केवलं लिङ्गाधीना, अपि तु सन्धि, उपधा,

अङ्गसंज्ञा, प्रत्ययविभागः इत्यादीनां समन्वयेन प्रवर्तते । एतादृश्या क्रमबद्धया अध्ययनपद्धत्या छात्राः अल्पेनापि प्रयासेन सुबन्तप्रक्रियायाः गूढतत्त्वं सुस्पष्टतया अवगन्तुं समर्थाः भवन्ति।

# IV. उपसंहारः

अष्टाध्याय्यादिप्राचीनग्रन्थाः श्रुतिपरम्परामनुसृत्य सहस्रेभ्यः वर्षेभ्यः प्राक् विरचिताः। तस्मिन् काले या शिक्षापद्धतिः विद्यमाना आसीत् सा तु इदानीं परिवर्तिता । आधुनिककाले लेखनसंप्रदायस्य, मुद्रणव्यवस्थायाः, गवेषणादीनां फलेन शिक्षापद्धत्यां बहुविधाः नूतनाशयाः आगताः। एतादृशाशयाः कथं लघुपाणिनीये समन्वितं इत्येन प्रबन्धेन लक्षीक्रियते। लघुपाणिनीयस्य सुबन्तप्रकरणपरासमीक्षायाम् अवगन्तुं शक्यते अवलोक्यमानेषु प्रक्रियाग्रन्थेषु सुबन्तप्रकरणस्य मूलाधारः प्रातिपदिकस्य अन्त्यवर्णलिङ्गयोः आश्रयेण रूपनिष्पादनमेव इति स्पष्टं भवति, तथापि ग्रन्थभेदेन विभागविन्यासे, विषयप्रस्तुतीकरणे, शिक्षणपद्धत्यां च सूक्ष्मभेदाः दृश्यन्ते, ये तत्तदाचार्याणां स्वकीयदृष्टिं प्रकाशयन्ति। लघुपाणिनीयं तु एतेभ्यः सर्वेभ्यः विशिष्यते, यतः अत्र सुबन्तप्रक्रिया प्रत्ययप्रधानदृष्ट्या पाणिनीयसूत्रतत्त्वानुसारं पुनर्व्यवस्थापिता, येन सा अधिका वैज्ञानिकी, विश्लेषणात्मिका, समन्विता च जाता, अतः प्रक्रियाग्रन्थानां विकासक्रमे लघुपाणिनीयस्य स्थानमुत्कर्षेण प्रतिष्ठितं वर्तते।

## ग्रन्थसूची

**[1]** Rajavarma, A. R. 1990. Laghupaniniyam. University of Kerala.

**[2]** Rangacharya, M. (Ed.). 1927. Rupavatara (Parts 1 and 2, by Dharmakirti). G. A. Natesan & Co.

**[3]** Shiv Dutt. 2011. Siddhanta kaumudi with the Tattvabodhini commentary. Chaukhambha Vidya Bhawan.

**[4]** Vimalasaraswati. 1973. Roopamaala (Ed. by Keshav Dev Sastri). Motilal Banarsidass Publishers.